# Shri Mahaganapati Panchavarana Stotram

# श्री महागणपति पञ्चावरणस्तोत्रम्

## Document Information

Text title : Shri Mahaganapati Panchavarana Stotram

File name : mahAgaNapatipanchAvaraNastotraM.itx

Category : ganesha, stotra

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# श्री महागणपति पञ्चावरणस्तोत्रम्

अधस्तान्मानुषाकारं पुरस्तात्कुञ्जराकृति ।
निरस्ताशेषदुरितं पुरस्तादस्तु वस्तु नः ॥

अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय स्वरूपाय शिवाय गुरवे नमः ॥

श्रीशिवः -
सृष्टिस्थितिविनाशानां विश्वस्यास्यैककारणम् ।
महागणपतिं वन्दे पञ्चावरणसंयुतम् ॥ १॥

क्रीडासक्तगणाधीश करशीकरपूरितम् ।
ऐक्षवाम्भोनिधिं वन्दे तरङ्गकुलसङ्कुलम् ॥ २॥

तस्य मध्ये द्वीपवर्यं नौमि रत्नशिलातलम् ।
सेवागतामराधीश दैत्यसिद्धसमाकुलम् ॥ ३॥

पारिजातकसन्तान मन्दारहरिचन्दनान् ।
सकल्पवृक्षान् तत्रस्थान् संश्रितेष्टवरप्रदान् ॥ ४॥

पलाशपल्लवफल प्रसूनर्तुवरव्रजैः ।
युगपत्सेव्यमानस्य महतः कल्पशाखिनः ॥ ५॥

तेषां ज्वलन्मरकत प्रवालकमणिव्रजात् ।
अधस्तात्कौमुदीबालातपाभ्यां सङ्कुलस्थलीम् ॥ ६॥

रत्नवेदीं यजेत्पूर्णकुम्भदीपोपशोभिताम् ।
लसद्वितानसंयुक्तां चतुःस्तम्भविराजिताम् ॥ ७॥

मुक्ताप्रवालशोभाढ्यां नानारत्नैश्च शोभिताम् ।
तत्र धर्मादिसिंहास्य चतुष्पादसमन्वितम् ॥ ८॥

पूजयामि विभोः पीठमधर्माद्युपशोभितम् ।

तन्मध्ये लिपिसंयुक्तं दलाष्टकमनोहरम् ॥ ९॥

षट्कोणचक्रमध्यस्थं त्रिकोणाङ्कितकर्णिकम् ।
वृत्तभूवलयोपेतं विलसत्केसरान्वितम् ॥ १०॥

सर्वशक्त्याख्यकमलं पूजयाम्यासनात्मकम् ।
तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ॥ ११॥

उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ।
किञ्जल्ककर्णिकासीना यास्ताः शोणाङ्गवाससः ॥ १२॥

वन्दे वराभयकराः पीठशक्तीर्गणेशितुः ।
त्रिकोणकर्णिकायां तु सुखासीनं सुरार्चितम् ॥ १३॥

जपाकुसुमसङ्काशं दीप्तिरञ्जितदिङ्मुखम् ।
गजाननं जगद्वन्द्यं तुन्दिलं चन्द्रशेखरम् ॥ १४॥

एकदन्तं त्रिणयनं नागयज्ञोपवीतिनम् ।
रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनम् ॥ १५॥

फणामणिलसद्भोग भोगिभूषणभूषितम् ।
वामनाङ्घ्रिकराम्भोजं दशदोर्दण्डमण्डितम् ॥ १६॥

रमाविष्ण्वादिमिथुन हेत्यलङ्कृतविग्रहम् ।
दक्षवामकराग्रेषु बीजापूरं गदां धनुः ॥ १७॥

ऐक्षवं त्रिशिखं चक्रं कमलं पाशमुत्पलम् ।
कलमाग्रं स्वरदनं पुष्करे कलशं शुभम् ॥ १८॥

दधानं कलशस्थानि नानारत्नानि सर्वदा ।
वितरन्तं स्वभक्तेभ्योऽभितःसंसृतिधारया ॥ १९॥

गण्डस्थलगलद्दान गन्धलुब्धान्मुहुर्मुहुः ।
निवारयन्तं मधुपान् कर्णतालनघट्टनैः ॥ २०॥

महागणपतिं वन्दे वरदं शक्तिसंयुतम् ।
वामाङ्के गणनाथस्य सुखासीनां शुचिस्मिताम् ॥ २१॥

करेण पतिमालिङ्ग्य दक्षिणेनेतरेण तु ।
बिभ्रतीं फुल्लकमलं कृपाविस्तृतवीक्षणाम् ॥ २२॥

दिव्यमाल्याम्बरालेपां दिव्याभरणभूषिताम् ।
साधकाभीष्टसर्वार्थ सिद्धिदानैकतत्पराम् ॥ २३॥

गौराङ्गीं गणनाथस्य शक्तिं भक्त्याऽभिवादये ।
अग्रे बिल्वतरोर्मूले दिव्यसिंहासनस्थितौ ॥ २४॥

विद्युन्नीलाम्बुदनिभौ द्विचतुर्बाहुशालिनौ ।
पद्मद्वयगदाखड्गशङ्खचक्रायुधान्वितौ ॥ २५॥

श्वेतपीताम्बरधरौ दिव्यालेपनभूषितौ ।
रमारमेशौ संस्तौमि गणेशाभिमुखस्थितौ ॥ २६॥

गणेशदक्षिणे भागे वटवृक्षस्थले स्थितौ ।
त्र्यक्षौ सिंहासनासीनौ सुरासुरनिषेवितौ ॥ २७॥

हाटकस्फटिकप्रख्यौ पृथग्बाहुचतुष्टयौ ।
पाशाङ्कुशवराभीति द्वयशूलपरश्वधौ ॥ २८॥

दिव्यमालाम्बरालेप भूषणाविन्दुशेखरौ ।
गणेशाभिमुखासीनौ नौम्युमावृषभध्वजौ ॥ २९॥

गणेशोत्तरभागस्थौ बोधिवृक्षस्थले स्थितौ ।
दिव्यसिंहासनारूढौ हेमविद्रुमसन्निभौ ॥ ३०॥

दिव्यमाल्याम्बरालेपभूषणौ द्विद्विबाहुकौ ।
उत्पलद्वयपुण्ड्रेक्षु चापपुष्पशरायुधौ ॥ ३१॥

गणेशाभिमुखासीनौ प्रस्तौमि रतिमन्मथौ ।
गणेशवाम भागस्थौ प्रियङ्गुद्रुममूलगौ ॥ ३२॥

नीलोत्पलद्युतिनिभौ दिव्यसिंहासनाश्रितौ ।
शुकव्रीह्यग्रचक्रोद्यद्गदाभीतिवरान्वितौ ॥ ३३॥

श्वेतपीताम्बरौ दिव्यमाल्यालेपनभूषितौ ।
गणेशाभिमुखासीनौ द्विचतुर्बाहुशालिनौ ॥ ३४॥

आधारभूतौ भूतानां भूवराहौ समाश्रये ।
षट्कोणस्थानगामोद प्रमोदोन्मुखदुर्मुखान् ॥ ३५॥

अविघ्नं विघ्नकर्तारं गणेशाभिमुखस्थितान् ।
शोणाङ्गान् शुभ्रमाल्यांश्च त्रिणेत्रान् भोगिभूषणान् ॥ ३६॥

पाशाङ्कुशवराभीति हस्तानर्धेन्दुशेखरान् ।
ऋद्ध्यादिशक्तिसहितान् गजवक्त्रान् समाश्रये ॥ ३७॥

ऋद्धिस्समृद्धिश्च तथा कान्तिश्च मदनावती ।
मदद्रवा द्राविणी च षडामोदादिशक्तयः ॥ ३८॥

यास्ताश्चामीकरनिभाः सम्फुल्लाम्बुजधारिणीः ।
दिव्याभरणमाल्यानुलेपनांशुकभूषणाः ॥ ३९॥

आत्मेशाङ्कस्थिताः सौम्याः सिद्धिदाः शरणं भजे ।
गणेशोभयपार्श्वस्थौ मुक्तामाणिक्यसन्निभौ ॥ ४०॥

सदा धनानि वर्षन्तौ स्वशक्तिभ्यां समन्वितौ ।
वसुधारावसुमतीभ्यां श्रये शङ्खाख्यपद्मकौ ॥ ४१॥

वह्नीशरक्षो वाय्वग्र पृष्ठेष्वङ्गानि षड्विभोः ।
हृदादीनि प्रसन्नानि नानावर्णाकृतीनि च ॥ ४२॥

गणेशाभिमुखस्थानि नतिमुद्राणि संश्रये ।
दिव्यांशुकालेपमाल्याः पृथग्वर्णाननाकृतीः ॥ ४३॥

स्वहेतिवाहनोपेताः स्तौमि ब्राह्म्यादिमातृकाः ।
प्रागादिदिक्पतीन् स्वस्वहेतिवाहनसंयुतान् ।
नानावर्णाकृतीन् सौम्यानिन्द्रादीन् शरणं भजे ॥ ४४॥

चतुश्चत्वारिंशत्परिगणितपद्यैर्विरचितं
गणेशस्तोत्रं यः पठति नियतात्मा स लभते ।
धनं धान्यं पुत्रान् जननृपवशित्वं पशुचयं
चिरायुस्सद्विद्यां विपुलतरकीर्तिं शिवपदम् ॥ ४५॥

चतुश्चत्वारिंशत्परिगणितमेतत्प्रतिदिनं
जपेदष्टद्रव्यैर्गणपतिसमाराधनपरः ।
चतुश्चत्वारिंशद्दिवसमिति जप्त्वा स लभते
सकृच्छ्रानिष्टार्थानपि जपदिनेष्वेव सुलभान् ॥ ४६॥

नारिकेलकदलीफललाजान्मोदकान्पृथुकसक्तुतिलेक्षून् ।
सन्निवेद्य परितर्प्य गणेशं कीर्तयेत्स्तवमिमं पुमर्थदम् ॥ ४७॥

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं वल्लभायुक्तो गणेशः क्षन्तुमर्हति ॥ ४८॥

इति श्रीमहाशैवतन्त्रान्तर्गतं महागणपतिपञ्चावरणस्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Mahaganapati Panchavarana Stotram*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*